## ॥ श्री कृष्णाष्टकम् ॥

**|| śrī kṛṣṇāṣṭakam ||**

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।

देवकीपरमानन्दं कृष्णं वंदे जगद्गुरुम् ॥ १ ॥

vasudevasutaṁ devaṁ kaṁsacāṇūramardanam|
devakīparamānandaṁ kṛṣṇaṁ vande jagadgurum || 1||

अतसीपुष्पसंकाशम् हारनूपुरशोभितम् ।

रत्नकण्कणकेयूरं कृष्णं वंदे जगद्गुरुम् ॥ २ ॥

atasīpuṣpasaṅkāśam hāranūpuraśobhitam|
ratnakaṇkaṇakeyūraṁ kṛṣṇaṁ vande jagadgurum || 2||

कुटिलालकसंयुक्तं पूर्णचंद्रनिभाननम् ।

विलसत्कुण्डलधरं कृष्णं वंदे जगद्गुरुम् ॥ ३ ॥

kuṭilālakasaṁyuktaṁ pūrṇacandranibhānanam|
vilasatkuṇḍaladharaṁ kṛṣṇaṁ vande jagadgurum || 3||

मंदारगन्धसंयुक्तं चारुहासं चतुर्भुजम् ।

बर्हिपिञ्छावचूडाङ्गं कृष्णं वंदे जगद्गुरुम् ॥ ४ ॥

mandāragandhasaṁyuktaṁ cāruhāsaṁ caturbhujam|
barhipiñchāvacūḍāṅgaṁ kṛṣṇaṁ vande jagadgurum || 4||

उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभम् ।

यादवानां शिरोरत्नं कृष्णं वंदे जगद्गुरुम् ॥ ५ ॥

utphullapadmapatrākṣaṁ nīlajīmūtasannibham|
yādavānāṁ śiroratnaṁ kṛṣṇaṁ vande jagadgurum || 5||

रुक्मिणीकेळिसंयुक्तं पीतांबरसुशोभितम् ।

अवाप्ततुलसीगन्धं कृष्णं वंदे जगद्गुरुम् ॥ ६ ॥

rukmiṇīkeḻisaṁyuktaṁ pītāmbarasuśobhitam|
avāptatulasīgandhaṁ kṛṣṇaṁ vande jagadgurum || 6||

गोपिकानां कुचद्वन्द्व कुंकुमाङ्कितवक्षसम् ।

श्री निकेतं महेष्वासं कृष्णं वंदे जगद्गुरुम् ॥ ७ ॥

gopikānāṁ kucadvandva kuṅkumāṅkitavakṣasam|
śrī niketaṁ maheṣvāsaṁ kṛṣṇaṁ vande jagadgurum || 7||

श्रीवत्साङ्कं महोरस्कं वनमालाविराजितम् ।

शङ्खचक्रधरं देवं कृष्णं वंदे जगद्गुरुम् ॥ ८ ॥

śrīvatsāṅkaṁ mahoraskaṁ vanamālāvirājitam|
śaṅkhacakradharaṁ devaṁ kṛṣṇaṁ vande jagadgurum || 8||

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।

कोटिजन्मकृतं पापं स्मरणेन विनष्यति

kṛṣṇāṣṭakamidaṁ puṇyaṁ prātarutthāya yaḥ paṭhet|
koṭijanmakṛtaṁ pāpaṁ smaraṇena vinaṣyati

**॥ इति कृष्णाष्टकम् ॥**

**|| iti kṛṣṇāṣṭakam ||**